


WWJMRD 2023; 9(6): 118-119
www.wwjmrd.com
*International Journal*
*Peer Reviewed Journal*
*Refereed Journal*
*Indexed Journal*
*Impact Factor SJIF 2017: 5.182 2018: 5.51, (ISI) 2020-2021: 1.361*
*E-ISSN: 2454-6615*

Dr Surender Pal
Department of Vyakaran
Maharshi Valmiki Sanskrit University, Kaithal
Haryana

**Correspondence:**
Dr Surender Pal
Department of Vyakaran
Maharshi Valmiki Sanskrit University, Kaithal
Haryana

# मत्स्यपुराणे आर्ष-क्रियापदानि

**Abstract**
भारतीय-संस्कृत-साहित्ये-अष्टादशपुराणानि अष्टादशश्चैव उपपुराणानि प्रचक्षन्ते । पुराणानां नामानि श्लोक-माध्यमेन इत्थं सन्ति । यथा-
मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिंगकूस्कानि पुराणानि प्रचक्षते ।।

**Keywords:** भारतीय-संस्कृत-साहित्ये, आर्ष-क्रियापदानि

**Introduction**

एतेषु पुराणेषु एकं पुराणं मत्स्यपुराणमपि वर्तते । यस्मिन् ***14000*** श्लोकाः सन्ति चतुषष्टयधिकशत-तमोऽध्यायाश्च सन्ति । अस्मिन् पुराणे प्रयुक्त-क्रियापदानाम् अध्ययनं कुर्वन् इदं प्राप्यते यत् मत्स्यपुराणे प्रयुक्तानि बहुषु क्रियापदेषु पाणिनेः सूत्रैः सिद्धेषु क्रियापदेषु असमानता प्राप्यते । यत् संस्कृतवाङ्मये द्वयोः प्रकारयोः पदानि भवन्ति – परस्मैपदम् आत्मनेपदञ्च । केचन धातवः केवलं परस्मैपदिनः भवन्ति तथा केचन आत्मनेपदिनः भवन्ति केचन च धातवः उभयपदिनः भवन्ति । अर्थात् ये धातवः द्वयोः पदयोः प्रयुक्ताः भवन्ति । एतेषाम् उभयदीनां धातूनां सम्बन्धे पाणिनेः इदं मतमस्ति यत् ये धातवः स्वरितेत् सन्तु या ञित् सन्तु तथा क्रियाफलं कर्तृगामी भवतु तु तेषां धातूनां प्रयोगः आत्मनेपदे भवति । "स्वरित्ञितः कर्त्रभिप्राये क्रियाफले" । यथा 'देवदत्तः पचते' अत्र 'पचते' क्रियारूपे देवदत्तः निजार्थं पचते । अतः पच् धातोः आत्मनेपदम् अभवत् । 'देवदत्तः पचति' अस्मिन् प्रयोगे 'पचति' क्रियारूपे देवदत्तः अन्यार्थं पचति । अतः अत्र परस्मैपदम् अभवत् । मत्स्यपुराणे प्रयुक्त-क्रियापदेषु पाणिनेः नियमैः निर्मित-क्रियापदेषु पदव्यत्यय-सम्बन्धी-अनियमितता प्राप्यते । अतः सर्वप्रथमस्तु मया तेषां क्रियापदानां वर्णनं क्रियते यत्र परस्मैपदं भवितव्यं, परन्तु तस्य स्थाने आत्मनेपदस्य प्रयोगम् अकरोत् । यथा –अयं श्लोकः द्रष्टव्यः अस्ति । यथा -

अस्मिन् श्लोके यस्य 'कूजन्ते' क्रियारूपस्य प्रयोगोऽभवत्, अस्य स्थाने 'कूजन्ति' क्रियारूपस्य प्रयोगः भवितव्यः, यतः कूज् – अव्यक्तशब्दे इत्यस्मिन् अर्थे अयं धातुः पाणिनेः मूलधातु-पाठे परस्मैपदे अपठत् अत्र च अस्य धातोः कृते पाणिनिः केनापि नियमेन अत्मनेपदस्य विधानं न अकरोत्, परन्तु अत्र आत्मनेपदरूपस्य प्रयोगम् अकरोत् । अतः एतादृशाः प्रयोगाः पाणिनि-पुराणयोः प्रयोगेषु अनियमिततां दर्शयन्ति । अतः इदम् उदाहरणमपि द्रष्टव्यमस्ति । यथा –

अत्र 'वमन्ते' क्रियारूपस्य प्रयोगं न कृत्वा 'वमन्ति' क्रियारूपस्य प्रयोगः कुर्यात् । यतः 'वम्' उदिगरणे धातुः पाणिनिः मूलधातुपाठे परस्मैपदे अपठत्, परन्तु अस्मिन् उदाहरणे आत्मनेपदप्रयोगम् अकरोत् । अत्र 'शेषात् कर्तरि परस्मैपदम्' इति सूत्रेण परस्मैपदविधानम् अभवत् । अतः इदं क्रियारूपमपि पाणिनेः पुराणस्य भिन्नतां दर्शयति ।

अद्युना मया तेषां क्रियारूपस्य वर्णनं क्रियते येषां प्रयोगः आत्मनेपदे भवितव्यः परन्तु मत्स्यपुराणे तेषां क्रियारूपाणां प्रयोगः पस्मैपदेऽभवत् । यथा -

अत्र 'प्रकाशन्ते' इति क्रियारूपस्य प्रयोगम् अकृत्वा 'प्रकाशन्ति' क्रियारूपस्य प्रयोगोऽपि पाणिनेः असमानतामेव दर्शयति । यतः पाणिनिः मुनिः काश्-दीप्तौ धातुम् आत्मनेपदे अपठत् । काश् धातुः अनुदात्तेत् अस्ति । अतः 'अनुदात्तङित आत्मनेपदम् ' इति सूत्रेण आत्मनेपदं भवितव्यम् एतस्मै धातवे च परस्मैपदविधानस्य कृते किमपि सूत्रं नास्ति, तथापि अत्र परस्मैपदस्यैव प्रयोगम् अकरोत् । अनया असमानतया या अनियमिततया सम्बन्धितानि अन्यानि उदाहरणानि अपि द्रष्टव्यानि सन्ति । यथा –

अस्मिन् श्लोके 'अग्रसत' इति क्रियारूपस्य स्थाने 'अग्रसत्' क्रियारूपस्य प्रयोगम् अक्रियत । अस्मिन् उदाहरणेऽपि पदव्यत्ययमस्ति । अपि च यथा -

अत्र 'त्वरन्ते' क्रियारूपस्य स्थाने 'त्वरन्ति' क्रियारूपमपि पदव्यत्ययमेव प्रकाशयति । अपि च यथा –

'लम्ब्' धातुः पाणिनेः मूलधातुपाठे आत्मनेपदी अपठत्, परन्तु अत्र अस्य प्रयोगः परस्मैपदरूपे अक्रियत । अस्य प्रयोगस्य कृते पाणिनिः किमपि सूत्रं न अपठत् त्वपि अत्र पदव्यत्ययमस्ति । एवं 'त्रै' पालने धातोः विषयेऽपि उदाहरणं प्राप्यते यथा –

अस्मिन् श्लोके 'त्राहि' अस्य क्रियारूपस्य प्रयोगः लोट्लकारस्य मध्यमपुरुषं मत्वा अक्रियत्, परन्तु अस्य स्थाने 'त्रायस्व' क्रियारूपस्य प्रयोगः यदि भवेत् तु उचितः भवति यतः अयं धातुस्तु आत्मनेपदे अपठत् । अन्यदपि उदाहरणं द्रष्टुं शक्यते । यथा –

अस्मिन् उदाहरणे 'आरभेत्' क्रियारूपस्य प्रयोगं द्रष्टुं शक्यते । यत् रभ् धातोः अत्रापि परस्मैपदमेव प्रयोगम् अकरोत् । यदि अस्य प्रयोगस्य स्थाने 'आरभेत्' क्रियारूपस्य प्रयोगः भवेत् तर्हि उचितः प्रतीयते । यतः 'रभ्' धातोः पाठस्तु आत्मनेपदस्य प्रकरणेऽभवत् प्रयोगः च परस्मैपदे अकरोत् । अपि च

अत्र 'मन्त्रयन्ति' क्रियारूपस्य प्रयोगः अभवत् यत् परस्मैपदे सिध्यति अयं धातुश्च चुरादिगणे आत्मनेपदी पाणिनिना पठितः । अतः अस्य स्थाने 'मन्त्रयन्ते' क्रियारूपस्य प्रयोगोऽपि भवितुम् अर्हति । अतः उपरिवर्णितानि उदाहरणानि दृष्ट्वा वक्तुं शक्यते यत् पाणिनिना प्रयुक्तानां क्रियापादानां प्रयोगे मत्स्यपुराणे च प्रयुक्तानां क्रियापदानां प्रयोगे पदव्यत्यय-सम्बन्धी अनियमितता दृश्यते । यतः बहुषु स्थलेषु इदं प्राप्यते यत् सूत्रं विनापि पदव्यत्यय-सम्बन्धि-परिवर्तनम् अकरोत् यत् पाणिनेः भिन्नतामेव दर्शयति । अतः पुराणे प्रयुक्त-भाषायां निज-बुद्ध्यानुसारमेव पदव्यत्ययं स्वीकृतम् । अन्ये प्रयोगापि दृष्टव्याः सन्ति । यथा

अत्र 'रम्' क्रीड़ायाम् धातोः निष्पन्नः द्वयोः क्रियारूपयोः प्रयोगोऽभवत् । यथा- रराम, रमते च ।

अनयोः रूपयोः अयं धातुः उभयपदरूपे प्रयुक्तः अभवत् । यतः अयं धातुः मूलधातुपाठे केवलं आत्मनेपदरूपे एव अपठत् । परञ्च अत्र अस्मात् विपरीतः प्रयोगौ प्राप्नुतः । पाणिनिः मुनिः 'व्याङ्परिभ्यो रमः' अनेन सूत्रेण परस्मैपदस्य विधानम् अक्रियत अर्थात् वि-आ-परि एतैः त्रिभिः उपसर्गैः सहैव 'रम्' धातोः परस्मैपदे प्रयोगः भवति । यतः 'रम्' धातुः अनुदात्तेत् हेतोः 'अनुदात्तङित् आत्मनेपदम् ' अनेन सूत्रेण आत्मनेपदमेव भवति, परञ्च उपर्युक्तोदाहरणे अस्य नियमस्य अपालयन् अपि 'रराम' क्रियारूपस्य प्रयोगः अक्रियत । अपि च-

अनयोः श्लोकयोः 'वृतु' – वर्तने धातोः निष्पन्नः भूत्वा अनुवर्तेत, निवर्तेत् च रूपद्वयस्य प्रयोगः अभवत् । वृत् धातोः च पाठः आत्मनेपदमेव अकरोत् । किन्तु अनयोः रूपयोः इमं धातुं उभयपदिनं मत्वा पदद्वयोः प्रयोगः अकरोत् । वृत् धातोः अन्यानि उदाहरणानि अपि अत्र दृष्टव्यानि सन्ति । यथा – वर्तन्ति , वर्तामि , वर्त , प्रवर्तन्ति , इत्यादीनि ।

एतेषु सर्वेषु उदाहरणेषु 'वृत्' धातुं उभयपदिनं स्वीकृत्य परस्मैपदस्य रूपाणां प्रयोगः अक्रियत । 'वर्त' क्रियारूपस्य च स्थाने 'वर्तस्व' क्रियारूपस्य प्रयोगः भवितव्यः ।

'जन्' धातोः निषपन्न रूपेषु अपि एतादृशीं पदव्यत्यय-सम्बन्धी-असमानतां द्रष्टुं शक्यते । यथा –

अत्रापि 'जन्' धातुम् उभयपदिनं मत्वा 'जायेत् ' क्रियारूपस्य प्रयोगं अकरोत् । अतः अस्य स्थाने 'जायेत' क्रियारूपस्य प्रयोगोऽपि भवितुम् अर्हति । अपि च-

अत्र 'मृ'-प्राणत्यागे धातुम् उभयपदिनं मत्वा म्रियेत् , म्रियते एतयोः द्वयोः क्रियारूपयोः प्रयोगं कृतम् अस्ति । परञ्च पाणिनिः 'मृ' धातोः पाठः आत्मनेपदमेव अकरोत् । आत्मनेपदस्य कृते च 'म्रियतेर्लुङ्लिङोश्च ' अस्य सूत्रविशेषस्य अपि विधीयते । अर्थात् 'मृ' धातुम् आत्मनेपदं केवलं लुङ् लिङ् च लकारद्वयोः एवं भवितव्यम् । परञ्च 'म्रियेत्' अस्मिन् क्रियारूपे विधिलिङ्लकारे सति अपि परस्मैपदस्य प्रयोगः अक्रियत ।

अद्युना तेषां धातुनां वर्णनं क्रियते ये धातवः पाणिनेः मूलधातुपाठे तु परस्मैपदिनः सन्ति मत्स्य पुराणे च तान् धातून् उभयपदिनं मत्वा तैः निष्पन्नः क्रियारूपाणां प्रयोगः अभवत् । यथा

अत्र 'क्रम्'-पादविक्षेपे धातोः द्वयोपदयोः प्रयोगः अभवत् । यथा – उपचक्रमुः संक्रमेते च । अस्य धातोः गणना परस्मैपदे एव अकरोत् । 'उपचक्रमुः' अस्मिन् क्रियारूपे तु 'प्रोपाभ्यां समर्थाभ्यां ' पाणिनेः सूत्रेण आत्मनेपदस्य प्रयोगः भवेत् , किन्तु अत्र अस्य नियमस्यापि परिपालनं नाभवत् ।

'जि' धातुम् उभयपदिनं मत्वा द्वयोः पदयोः अस्य प्रयोगः अभवत् । यथा – 'विजेष्यामः जयते' च ।

अत्र 'विजेष्यामः' अस्य उदाहरणस्य विषये एकः विषयः विचारणीयः अस्ति यत् पाणिनिः मुनिः 'विपराभ्यां जेः ' अस्य सूत्र-विशेषस्य विधानम् अकरोत् । यस्यार्थः अस्ति यत् वि परा च उपसर्गपूर्वकं जि धातोः प्रयोगे सति आत्मनेपदं भविष्यति, परञ्च अस्मिन् उदाहरणे वि उपसर्गस्य पूर्वे सत्यपि परस्मैपदमेव अभवत् । उपसर्गरहिते सति च आत्मनेपदम् अभवत् । यथा – 'जयते' । यद्यपि 'जयते' क्रियारूपस्य स्थाने तु 'जयति' विजेष्यामः च क्रियारूपस्य स्थाने 'विजेष्यामहे' क्रियारूपस्य प्रयोगः भवेत् । अतः अत्र नियमस्य विपरीत-प्रयोगोऽभवत् । 'तृ'-प्लवनतरणयोः धातोऽपि द्वयोः पदयोः प्रयोगाः दृश्यन्ते ।

उपरिवर्णितानांम् उदाहरणानाम् आधारे वक्तुं शक्यते यत् पाणिनापठित-धातुषु मत्स्यपुराणे प्रयुक्तधातुषु पर्याप्तमात्रायां पदव्यत्ययः दृश्यते ।

डॉ. सुरेन्द्र पाल
सह – आचार्य
महर्षि वाल्मीकि संस्कृत विश्वविद्यालय, कैथल